(जीवतीति। जीव प्राणे+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) प्राणी। (यथा, भागवते।१।१३।४४।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥")
वृत्तिः। वृक्षविशेषः। (स एव महानिम्बवृक्षः। तत्पर्य्याया यथा,—
"महानिम्बः स्मृतोद्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बकश्च कार्म्मुको जीव इत्यपि॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
वृहस्पतिः। इति मेदिनी। वे, ८॥ (यथा, काशीखण्डे।१७।४४।
"अस्माल्लिङ्गार्च्चनान्नित्यं जीवभूतोऽसि मे यतः।
अतो जीव इति ख्यातिं त्रिषु लोकेषु यास्यसि॥")
कर्णः। इति धरणी॥ क्षेत्रज्ञः। तत्पर्य्यायः। आत्मा २ पुरुषः ३ पुद्गलः ४ अन्तर्यामी ५ ईश्वरः ६। इति त्रिकाण्डशेषः। (यथा, भगवद्गीतायाम्।१३।२ टीकायां श्रीधरस्वामिपादाः।
"तञ्च क्षेत्रज्ञं संसारिणं जीवं वस्तुतः सर्व्वक्षेत्रेष्वनुगतं मामेव विद्धि॥") तस्य स्वरूपं यथा,—
"कर्म्मणा जीवरूपश्च सन्ततं तत्फलप्रदः।
कर्म्मरूपश्च भगवान् श्रीकृष्णः प्रकृतेः परः॥
सोऽपि तद्धेतुरूपश्च कर्म्म तेन भवेत् सति।
जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च॥
आत्मनः प्रतिविम्बश्च देही जीवः स एव च।
प्राणदेहादिभृद्देही स जीवः परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ * ॥
(तथाच भागवते।१२।१८४।१७।
"जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते॥")
वेदान्तमते घटावच्छिन्नाकाशवत् शरीरत्रितयावच्छिन्नं चैतन्यम्। केषाञ्चिन्मते दर्पणस्थमुखप्रतिविम्बवत् बुद्धिस्थचैतन्यप्रतिविम्बम्॥ (जीवयति लोकानन्तर्य्याम्यात्मकरूपेणेति। जीव+णिच्+अच्। विष्णुः। यथा, महाभारते।१३।१५६।६८।
"जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः॥"
जीवनविशिष्टे, त्रि। यथा, महाभारते।१२।२८८।२३।
"मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जनः॥")
जीवः, पुं क्ली, (जीव+भावे घञ्।) जीवितम्। इति मेदिनी। वे, ६॥ (यथा, भागवते।१।२।१०।
"जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः॥"
"जीवस्य जीवनस्य च पुनर्द्धर्म्मानुष्ठानद्वारा कर्म्मभिर्य्य इह प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति।" इति तट्टीकायां श्रीधरस्वामी॥)
जीवकः, पुं, (जीवयति आरोग्यं करोतीति। जीव+णिच्+ण्वुल्।) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। कूर्च्चशीर्षः २ मधुरकः ३ शृङ्गः ४ ह्रस्वाङ्गः ५। इत्यमरः।२।४।१४२॥ जीवनः ६ दीर्घायुः ७ प्राणदः ८ जीवः ९ भृङ्गाङ्कः १० प्रियः ११ चिरञ्जीवी १२ मधुरः १३ मङ्गल्यः १४ कूर्च्चशीर्षकः १५ वृद्धिदः १६ आयुष्मान् १७ जीवदः १८ बलदः १९। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तानिलार्त्तिक्षयदाहज्वरनाशित्वम्। शुक्रश्लेष्मविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ बलकारित्वम्। कार्श्यवातनाशित्वम्। तस्य रूपं यथा,—
"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ॥
जीवकः कूर्च्चकाकारः ऋषभो वृषशृङ्गवत्।
जीवकर्षभकस्थाने विदारीमूलम्॥"
इति भावप्रकाशः॥ * ॥
शायकः। पीतशालः। क्षपणः। इति मेदिनी। के, ९५॥
जीवकः, त्रि, (जीवति प्रभुसेवावृत्त्या इति। जीव+ण्वुल्।) सेवकः। वृद्ध्याजीवी। जीवी॥ (यथा, महाभारते।१३।१४१।६६।
"त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः॥")
अहितुण्डिकः। इति मेदिनी। के, ९५॥
जीवजीवः, पुं, (जीवेन भक्ष्यक्षुद्रकीटादिना जीवतीति। जीव+अच्। यद्वा, जीवञ्जीव+पृषोदरात् साधुः।) जीवञ्जीवपक्षी। इति शब्दरत्नावली॥
जीवञ्जीवः, पुं, (जीवं जीवयति विषदोषं नाशयतीति। कृत्यल्युटो बहुलमिति बाहुलकात् खच्।) चकोरपक्षी। इत्यमरः।२।५।३५॥ (अपरः पक्षिविशेषः। विषादिविकृतस्यान्नादेः परीक्षार्थमस्यावश्यकत्वं भवति। यथा, वाभटे सूत्रस्थाने ७ अध्याये १६।
"हंसः प्रस्खलति ग्लानिर्ज्जीवञ्जीवस्य जायते।
चकोरस्याक्षिवैराग्यं क्रौञ्चस्य स्यान्मदोदयः॥")
वृक्षविशेषः। इति मेदिनी। वे, ५९॥
जीवत्तोका, स्त्री, (जीवत् तोकं अपत्यं अस्याः।) जीवत्पुत्त्रिका। तत्पर्य्यायः। जीवसूः २। इति हेमचन्द्रः॥
जीवत्पतिः, स्त्री, (जीवन् पतिर्यस्याः।) सधवा। इति हेमचन्द्रः॥
जीवत्पितृकः, पुं, (जीवन् पिता यस्य इति कप्।) विद्यमानपितृकः। यथा,—
"अमास्नानं गयाश्राद्धं दक्षिणासुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृतेऽपि पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥
जीवथः, पुं, (जीवत्यनेनेति। जीव+"शीङ्शपिरुगमिवञ्चिजीवि प्राणिभ्योऽथः।" उणां ३। ११३। इति अथः।) प्राणः। कूर्म्मः। मयूरः। मेघः। धार्म्मिके चिरायुषि च त्रि। इत्युणादिकोषः॥
जीवदः, पुं, (जीवं जीवनं ददाति औषधादिसुप्रयोगेणेति। दा+कः।) वैद्यः। विद्विट्। इति मेदिनी। दे, २९॥ जीवनदातरि, त्रि॥
जीवदात्री, स्त्री, (जीवं जीवनं ददातीति। दा+तृच् ङीप् च।) ऋद्धिः। इति राजनिर्घण्टः॥
जीवधनं, क्ली, (जीव एव धनमिति।) गवादिकम्। इति त्रिकाण्डशेषः॥
जीवनं, क्ली, (जीव्यतेऽनेनेति। जीव+करणे ल्युट्।) वृत्तिः। (यथा, भागवते।१।१३।४४।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥"
"जीवनं जीविकेति॥" तट्टीकायां श्रीधरस्वामी॥)
जलम्। (यथा, आर्य्यासप्तशत्याम्।४६३।
"यमुनाया इव तस्याः सखि! मलिनं जीवनं मन्ये॥"
जीव+भावे ल्युट्।) प्राणधारणम्। इति मेदिनी। ने, ६९॥ (यथा, हठयोगप्रदीपिकायाम्।२।३।
"यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते॥"
"प्राणान् हन्ति जगत्प्राणो जीवनं हन्ति जीवनम्।
किमाश्चर्य्यं क्षारभूमौ प्राणदा यमदूतिका॥"
इत्युद्भटः॥)
हैयङ्गवीनम्। इति शब्दचन्द्रिका॥ मज्जा। इति राजनिर्घण्टः॥ (गङ्गा। यथा, काशीखण्डे।२९।६५।
"जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी॥")
जीवनः, पुं, (जीवयति सेवनादिना। जीव+कर्त्तरि ल्युः।) जीवकौषधम्। वातः। इति राजनिर्घण्टः॥ क्षुद्रफलकवृक्षः। इति शब्दचन्द्रिका॥ पुत्त्रः। इति हेमचन्द्रः॥ (सर्व्वान् प्राणरूपेण जीवयतीति। जीव+णिच्+कर्त्तरि ल्युः। विष्णुः। यथा, महाभारते।१३।१४९।११२।
"वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः॥"
शिवः। महाभारते।१३।१७।१२१।
"निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः॥")
जीवनकं, क्ली, (जीव्यतेऽनेन। जीव+करणे ल्युट्। ततः स्वार्थे कन्।) अन्नम्। इति हेमचन्द्रः॥
जीवनयोनिः, स्त्री, (जीवनस्य योनिः कारणम्।) यत्नविशेषः। स तु अतीन्द्रियः शरीरे प्राणसञ्चारकारणम्। इति भाषापरिच्छेदः॥
जीवनहेतुः, पुं, (जीवनस्य हेतुरुपायः।) वर्त्तनोपायः। स च दशविधः। यथा,—
"विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः।
वृत्तिर्भैक्ष्यं कुशीदञ्च दश जीवनहेतवः॥"
इति गारुड़े २१४ अध्यायः॥
जीवना, स्त्री, (जीवयतीति। जीव+णिच्+युच् ल्युः वा ततष्टाप्।) मेदौषधम्। इति मेदिनी। ने, ६९॥
जीवनाघातं, क्ली, (जीवनं आहन्त्यनेनेति। आ+हन्+करणे घञ्।) विषम्। इति शब्दचन्द्रिका॥
जीवनावासः, पुं, (आवसत्यस्मिन्। आ+वस+घञ्। जीवनं जलं आवासोऽस्य।) वरुणः। इति शब्दरत्नावली॥ (वारिवासिनि, त्रि॥)
जीवनिका, स्त्री, (जीवन+ठन्। टाप्। यद्वा, जीवनी+संज्ञायां कन् ह्रस्वश्च।) हरीतकी। इति राज-